# શક્રસ્તવઃ

Shakrastavah

sanskritdocuments.org

March 14, 2019

# Shakrastavah

## શક્રસ્તવઃ

## Sanskrit Document Information

Text title : Shakrastava

File name : shakrastava.itx

Category : deities_misc, jaina

Location : doc_deities_misc

Author : Siddhasenadivakarasuri

Transliterated by : DPD

Proofread by : DPD

Latest update : March 14, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 14, 2019

*sanskritdocuments.org*

# શક્રસ્તવઃ

સિદ્ધસેનદિવાકરસૂરિવિરચિતઃ શક્રસ્તવઃ ।

ધ્યાનમ્ ।
સર્વે જીવા ઉપાદેયા શક્તિરૂપાઃ શિવાત્મકાઃ ।
વ્યક્તિરૂપોલ્લસન્ મોક્ષાઃ પઞ્ચભિઃ પરમેષ્ઠિનઃ ॥

અથ શક્રસ્તવઃ ।

ૐ નમોઽર્હતે ભગવતે પરમાત્મને પરમજ્યોતિષે પરમપરમેષ્ઠિને
પરમવેધસે પરમયોગિને પરમેશ્વરાય તમસઃપરસ્તાત્ સદોદિતાદિત્યવર્ણાય
સમૂલોન્મૂલિતા-નાદિ-સકલ-ક્લેશાય ॥ ૧॥

ૐ નમોઽર્હતે ભૂર્ભુવઃસ્વસ્ત્રયીનાથ-મૌલિ-મન્દારમાલાર્ચિત-ક્રમાય
સકલ-પુરુષાર્થ-યોનિ નિરવદ્ય-વિદ્યાપ્રવર્તનૈક-વીરાયનમઃ
સ્વસ્તિ-સ્વધાસ્વાહા-વષડર્થૈ-કાન્ત-શાન્ત-મૂર્ત્તયે ભવદ્ ભાવિ-
ભૂત-ભાવાવભાસિને કાલપાશ-નાશિને સત્ત્વ-રજસ્તમો-ગુણાતીતાય
અનન્તગુણાય વાઙ્મનોઽગોચર-ચરિત્રાય પવિત્રાય
કરણ-કારણાય તરણતારણાય સાત્ત્વિક-દૈવતાય તાત્ત્વિક-જીવિતાય
નિર્ગ્રન્થ-પરમ-બ્રહ્મ-હૃદયાય યોગીન્દ્ર પ્રાણનાથાય ત્રિભુવન-
ભવ્ય-કુલનિત્યોત્સવાય વિજ્ઞાના-નન્દ-પરબ્રહ્મૈ-કાત્મ્યસાત્મ્ય-સમાધયે
હરિ-હર-હિરણ્યગર્ભાદિ-દેવતાપરિકલિત-સ્વરૂપાય સમ્યક્-શ્રદ્ધેયાય
સમ્યક્-શ્રદ્ધેયાય સમ્યક્ શરણ્યાય સુસમાહિત-સમ્યક્ સ્પૃહણીયાય ॥ ૨॥

ૐ નમોઽર્હતે ભગવતે આદિકરાય તીર્થઙ્કરાય સ્વયંસમ્બુદ્ધાય
પુરુષોત્તમાય પુરુષસિંહાય પુરુષવરપુણ્ડરીકાય પુરુષવર-ગન્ધહસ્તિને
લોકોત્તમાય લોકનાથાય લોકહિતાય લોક પ્રદીપાય લોકપ્રદ્યોતકારિણે
અભયદાય દૃષ્ટિદાય મુક્તિદાય માર્ગદાય બોધિદાય જીવદાય
શરણદાય ધર્મદાય ધર્મદેશકાય ધર્મનાયકાય ધર્મસારથયે
ધર્મ-વર-ચાતુરન્તચક્રવર્તિને વ્યાવૃત્ત-ચ્છદ્મને

અપ્રતિહત-સમ્યગ્જ્ઞાન-દર્શન-સદ્મને ॥ ૩॥

ૐ નમોઽર્હતે જિનાય જાપકાય તીર્ણાય તારકાય બુદ્ધાય બોધકાય મુક્તાય
મોચકાય ત્રિકાલવિદે પારઙ્ગતાય કર્માષ્ટક-નિષૂદનાય અધીશ્વરાય
શમ્ભવે જગત્પ્રભવે સ્વયમ્ભુવે જિનેશ્વરાય સ્યાદ્વાદવાદિને સાર્વાય
સર્વજ્ઞાય સર્વદર્શિને સર્વતીર્થો-પનિષદે સર્વપાષણ્ડમોચિને
સર્વયજ્ઞફલાત્મને સર્વજ્ઞકલાત્મને સર્વયોગરહસ્યાય કેવલિને
દેવાદિદેવાય વીતરાગાય ॥ ૪॥

ૐ નમોઽર્હતે પરમાત્મને પરમાપ્તાય પરમકારુણિકાય સુગતાય તથાગતાય
મહાહંસાય હંસરાજાય મહાસત્ત્વાય મહાશિવાય મહાબોધાય મહામૈત્રાય
સુનિશ્ચિતાય વિગત-દ્વન્દ્વાય ગુણાબ્ધયે લોકનાથાય જિત-માર-બલાય ॥ ૫॥

ૐ નમોઽર્હતે સનાતનાય ઉત્તમ-શ્લોકાય મુકુન્દાય ગોવિન્દાય વિષ્ણવે
જિષ્ણવે અનન્તાય અચ્યુતાય શ્રીપતયે વિશ્વરૂપાય હૃષીકેશાય
જગન્નાથાય ભૂર્ભુવઃ -સ્વઃ સમુત્તારાય માનઞ્જરાય કાલઞ્જરાય ધ્રુવાય
અજાય અજેયાય અજરાય અચલાય અવ્યયાય વિભવે અચિન્ત્યાય અસઙ્ખ્યેયાય
આદિ-સઙ્ખ્યાય આદિ-કેશવાય આદિ-શિવાય મહાબ્રહ્મણે પરમશિવાય
એકા-નેકાનન્ત-સ્વરૂપિણે ભાવા-ભાવ-વિવર્જિતાય અસ્તિ-નાસ્તિ-દ્વયાતીતાય
પુણ્ય-પાપ-વિરહિતાય સુખ-દુઃખ-વિવિક્તાય વ્યક્તા-વ્યક્ત-સ્વરૂપાય
અનાદિ-મધ્ય-નિધનાય નમોઽસ્તુ મુક્તીશ્વરાય મુક્તિ-સ્વરૂપાય ॥ ૬॥

ૐ નમોઽર્હતે નિરાતઙ્કાય નિઃસઙ્ગાય નિઃશઙ્કાય નિર્મલાય નિર્દ્વન્દ્વાય
નિસ્તરઙ્ગાય નિરુર્મયે નિરામયાય નિષ્કલઙ્કાય પરમદૈવતાય સદાશિવાય
મહાદેવાય શઙ્કરાય મહેશ્વરાય મહાવ્રતિને મહાયોગિને મહાત્મને
પઞ્ચમુખાય મૃત્યુઞ્જયાય અષ્ટમૂર્તયે ભૂતનાથાય જગદાનન્દાય
જગત્પિતામહાય જગદ્દેવાધિદેવાય જગદીશ્વરાય જગદાદિકન્દાય જગદ્ભાસ્વતે
જગત્-કર્મસાક્ષિણે જગચ્ચક્ષુષે ત્રયીતનવે અમૃતકરાય શીતકરાય
જ્યોતિશ્ચક્ર-ચક્રિણે મહાજ્યોતિ-ર્દ્યોતિતાય મહાતમઃ પારેસુપ્રતિષ્ઠિતાય
સ્વયઙ્કર્ત્રે સ્વયંહર્ત્રે સ્વયમ્પાલકાય આત્મેશ્વરાય નમો વિશ્વાત્મને ॥ ૭॥

ૐ નમોઽર્હતે સર્વદેવમયાય સર્વ ધ્યાનમયાય સર્વજ્ઞાનમયાય
સર્વતેજોમયાય સર્વમન્ત્રમયાય સર્વરહસ્યમયાય
સર્વ-ભાવાભાવ-જીવાજીવેશ્વરાય અરહસ્ય-રહસ્યાય
અસ્પૃહ-સ્પૃહણીયાય અચિન્ત્ય-ચિન્તનીયાય અકામકામધેનવે

અસઙ્કુલ્પિત-કલ્પદ્રુમાય અચિન્ત્ય-ચિન્તામણયે ચતુર્દશ-રજ્જ્વાત્મક
જીવલોક-ચૂડામણયે ચતુરશીતિ-લક્ષ-જીવયોનિ-પ્રાણિનાથાય
પુરુષાર્થ નાથાય પરમાર્થનાથાય। અનાથનાથાય જીવનાથાય
દેવ-દાનવ-માનવ-સિદ્ધસેનાધિ-નાથાય ॥ ૮॥

ૐ નમોઽર્હતે નિરઞ્જનાય અનન્ત-કલ્યાણ નિકેતન-કીર્તનાય
સુગૃહીત-નામધેયાય મહિમામયાય ધીરોદાત્ત-ધીરોદ્ધત-ધીરશાન્ત-
ધીરલલિત-પુરુષોત્તમ-પુણ્યશ્લોક-શત-સહસ્ર-લક્ષ-કોટિ-
વન્દિતપાદાર-વિન્દાય સર્વગતાય ॥ ૯॥

ૐ નમોઽર્હતે સર્વસમર્થાય સર્વપ્રદાય સર્વહિતાય
સર્વાધિનાથાય કસ્મૈચન ક્ષેત્રાય પાત્રાય તીર્થાય પાવનાય
પવિત્રાય અનુત્તરાય ઉત્તરાય યોગાચાર્યાય સંપ્રક્ષાલનાય
પ્રવરાય આગ્રેયાય વાચસ્પતયે માઙ્ગલ્યાય સર્વાત્મનીનાય સર્વાર્થાય
અમૃતાય સદોદિતાય બ્રહ્મચારિણે તાયિને દક્ષિણીયાય નિર્વિકારાય
વજર્ષભ-નારાચ-મૂર્ત્તયે તત્ત્વદર્શિને પારદર્શિને પરમદર્શિને
નિરુપમજ્ઞાન-બલ-વીર્યતેજઃ-શક્ત્યૈશ્વર્ય મયાય આદિપુરુષાય
આદિ-પરમેષ્ઠિને આદિમહેશાય મહાજ્યોતિઃસત્ત્વાય મહાર્ચિર્ધનેશ્વરાય
મહા-મોહ-સંહારિણે મહાસત્ત્વાય મહાજ્ઞામહેન્દ્રાય મહાલયાય મહાશાન્તાય
મહાયોગીન્દ્રાય અયોગિને મહામહીયસે મહાહંસાય હંસરાજાય મહાસિદ્ધાય
શિવ-મચલ-મરુજ-મનન્ત-મક્ષય-મવ્યાબાધ-મપુનરાવૃત્તિ-
મહાનન્દં મહોદયં સર્વદુઃખક્ષયં કૈવલ્યમમૃતં
નિર્વાણમક્ષરં પરબ્રહ્મ નિઃ શ્રેયસમપુનર્ભવં
સિદ્ધિગતિ-નામધેયં-સ્થાનસંપ્રાન્તવતે ચરાચર-મવતે નમોઽસ્તુ
શ્રીમહાવીરાય ત્રિજગત્સ્વામિને શ્રીવર્ધમાનાય ॥ ૧૦॥

ૐ નમોઽર્હતે કેવલિને પરમયોગિને (ભક્તિમાર્ગયોગિને) વિશાલ-શાસનાય
સર્વલબ્ધિ સમ્પન્નાય નિર્વિકલ્પાય કલ્પનાતીતાય કલા કલાપ-કલિતાય
વિસ્ફુર-દુરુ-શજ્જ-ધ્યાનાગ્નિ-નિર્દગ્ધકર્મબીજાય
પ્રાજાનન્ત-ચતુલયાય સૌમ્યાય શાન્તાય મઙ્ગલ-વરદાય
અષ્ટાદશદોષ-રહિતાય સંસૃત-વિશ્વ-સમીહિતાય સ્વાહા ॥ ૧૧॥

॥ ૐ હ્રીઁ શ્રીઁ અર્હ નમઃ ॥

લોકોત્તમો વન્દના -

લોકોત્તમો નિષ્પતિમસ્ત્વમેવ, ત્વં શાશ્વતં મઙ્ગલમપ્યધીશ
ત્વામેકમર્હન્ ! શરણપ્રપદ્યે, સિદ્ધર્ષિસદ્ધર્મમયસ્ત્વમેવ ॥ ૧॥

ત્વં મે માતા પિતા નેતા દેવો ધર્મો ગુરુઃ પરઃ
પ્રાણાઃ સ્વર્ગોઽપવર્ગશ્ચ સત્ત્વં તત્ત્વં ગતિર્મતિઃ ॥ ૨॥

જિનો દાતા જિનો ભોક્તા, જિનઃ સર્વમિદં જગત્ ।
જિનોજયતિસર્વત્ર, યોજિનઃસોઽહમેવ ચ ॥ ૩॥

યત્કિશ્ચિત્કુર્મહે દેવઃ સદાસુકૃતદુકૃતમ્ ।
તન્મે નિજપદસ્થસ્ય, હું ક્ષઃ ક્ષપય ત્વં જિન ! ॥ ૪॥

ગુહ્યાતિગુહ્ય ગોપ્તા ત્વં, ગહાણાસ્મત્કુતં જપમ્ ।
સિદ્ધિઃ શ્રયતિ માં યેન, ત્વત્પ્રસાદાત્ત્વયિ સ્થિતમ્ ॥ ૫॥

ફલશ્રુતિ

ઇતીમં પૂર્વોક્તમિન્દ્રસ્તવૈકાદશ મન્ત્રરાજોપનિષદ્ગર્ભં,
અષ્ટમહાસિદ્ધિપ્રદં, સર્વપાપનિવારણં,  સર્વપુણ્યકારણં,
સર્વદોષહરં, સર્વગુણાકરં, મહાપ્રભાવં, અનેક-સમ્યગ્
દૃષ્ટિ-ભદ્રક-દેવતા-શત-સહસ્ર-શુશ્રૂષિતં
ભવાન્તરકૃતા-ઽસઙ્ખ્ય પુણ્ય પ્રાપ્યં સમ્યગ્ જપતાં, પઠતાં, ગુણયતાં,
શૃણ્વતાં, સમનુપ્રેક્ષમાણાનાં, ભવ્યજીવાનાં, ચરાચરેઽપિ જીવલોકે
સદ્વસ્તુ તન્નાસ્તિ યત્કરતલપ્રણયિ ન ચ ભવતીતિ । કિં ચ ॥ ૧॥

ઇતીમં પૂર્વોક્તમિન્દ્રસ્તવૈકાદશ મન્ત્રરાજોપનિષદ્ગર્ભં,
અષ્ટમહાસિદ્ધિપ્રદં, સર્વપાપનિવારણં,  સર્વપુણ્યકારણં,
સર્વદોષહરં, સર્વગુણાકરં, મહાપ્રભાવં, અનેક-સમ્યગ્
દૃષ્ટિ-ભદ્રક-દેવતા-શત-સહસ્ર-શુશ્રૂષિતં
ભવાન્તરકૃતા-ઽસઙ્ખ્ય પુણ્ય પ્રાપ્યં સમ્યગ્ જપતાં, પઠતાં,
ગુણયતાં, શૃણ્વતાં, સમનુપ્રેક્ષમાણાનાં, ભવ્યજીવાનાં,
ભવનપતિ-વ્યન્તર-જ્યોતિષ્ક-વૈમાનિકવાસિનો દેવાઃ સદા પ્રસીદન્તિ
વ્યાધયો વિલીયન્તે ॥ ૨॥

ઇતીમં પૂર્વોક્તમિન્દ્રસ્તવૈકાદશમન્ત્રરાજોપનિષદ્ગર્ભં,
અષ્ટમહાસિદ્ધિપ્રદં, સર્વપાપનિવારણં, સર્વપુણ્યકારણં,
સર્વદોષહરં, સર્વગુણાકરં, મહાપ્રભાવં,

અનેક-સમ્યગદૃષ્ટિ-ભદ્રક-દેવતા-શત-સહસ્ર-શુશ્રૂષિતં,
ભવાન્તરકૃતા-ऽસઙ્ખ્ય-પુણ્ય-પ્રાપ્યં સમ્યગ્ જપતાં, પઠતાં,
ગુણયતાં, શૃણ્વતાં, સમનુપ્રેક્ષમાણાનાં, ભવ્યજીવાનાં,
પૃથિવ્યપ્-તેજોવાયુ-ગગનાનિ ભવન્ત્યનુકુલાનિ ॥ ૩॥

ઇતીમં પૂર્વોક્તમિન્દ્રસ્તવૈકાદશમન્ત્રરાજોપનિષદ્ગર્ભં,
અષ્ટમહાસિદ્ધિપ્રદં, સર્વપાપનિવારણં, સર્વપુણ્યકારણં,
સર્વદોષહરં, સર્વગુણાકરં, મહાપ્રભાવં,
અનેક-સમ્યક્-દૃષ્ટિ-ભદ્રક-દેવતા-શત-સહસ્ર-શુશ્રૂષિતં,
ભવાન્તરકૃતા-ऽસઙ્ખ્ય પુણ્યપ્યસમ્યગજપતાં, પઠતાં, ગુણયતાં,
શૃણ્વતાં, સમનુપ્રેક્ષમાણાનાં, ભવ્યજીવાનાં, સર્વસમ્પદા મૂલં જાયતે
જિનાનુરાગઃ ॥ ૪॥

ઇતીમં પૂર્વોક્તમિન્દ્રસ્તવૈકાદશ મત્રરાજોપનિષદ્ગર્ભં,
અષ્ટમહાસિદ્ધિપ્રદ, સર્વપાપનિવારણં, સર્વપુણ્યકારણં,
સર્વદોષહરં, સર્વગુણાકરં, મહાપ્રભાવં,
અનેક-સમ્યગદૃષ્ટિ-ભદ્રક-દેવતાશત-સહસ્ર-શુશ્રૂષિતં,
ભવાન્તરકૃતાऽસઙ્ખ્ય પુણ્ય પ્રાપ્યં સમ્યગ્ જપતાં, પઠતાં,
ગુણયતાં, શૃણ્વતાં, સમનુપ્રેક્ષમાણાનાં, ભવ્યજીવાનાં, સાધવઃ
સૌમનસ્યેનાનુગ્રહપરાં જાયન્તે ॥ ૫॥

ઇતીમં પૂર્વોક્તમિન્દ્રસ્તવૈકાદશ મત્રરાજોપનિષદ્ગર્ભં,
અષ્ટ્યહાસિદ્ધિપ્રદં, સર્વપાપનિવારણં, સર્વપુણ્યકારણં,
સર્વદોષહરં, સર્વગુણાકરં, મહાપ્રભાવં,
અનેકન્મમ્યગદૃતિભદ્રક-દેવતાન્યાત-સસ્મ-શુમૂવિતં,
ભવાન્તરકૃતऋऽસઙ્ખ્યપુણ્યપ્રાપ્યસમ્યત્જપતાં, પઠતાં, ગુણયતાં,
શૃણ્વતાં, સમનુપ્રેક્ષમાણાનાં, ભવ્યજીવાનાં, ખલાઃ ક્ષીયન્તે ॥ ૬॥

ઇતીમં પૂર્વોક્તમિન્દ્રસ્તયૈકાદશ મન્ત્રરાજોપનિષદ્ગર્ભં,
અષ્ટમહાસિદ્ધિપ્રદં, સર્વપાપનિવારણંઃ સર્વપુણ્યકારણં,
સર્વક્ષેષહ્મ, સર્વગુણાકરં, મહાપ્રભાવં,
અનેકન્મમ્યયષ્ટિઃભદ્રક-દેવતક્ષ્યશત-સહસ્રન્દામૂષિતં,
ભવાન્તરકૃતા-ऽસઙ્ખ્યપુણ્યપ્રાપ્યસમ્યગજપતાં, પઠતાં, ગુણયતાં,
શૃણ્વતાં, સમનુપ્રેક્ષમાણાનાં, ભવ્યજીવાનાં, જલ-સ્થલ-ગગનચરાઃ

ક્રૂરજન્તવોઽપિ મૈત્રીમયા જાયન્તે ॥ ૭॥

ઇતીમં પૂર્વોક્તમિન્દ્રસ્તવૈકાદશ મત્રરાજોપનિષદાર્ભ,
અષ્ટમહાસિદ્ધિપ્રદં, સર્વપાપનિવારણં, સર્વપુણ્યકારણં,
સર્વદોષહરં, સર્વગુણાકરં, મહાપ્રભાવં,
નેકન્મમ્યણતિભદ્રકબ્દેવતક્ષ્યશત-સહસ્ર-શુભૂવિતં)
ભવાન્તરકૃતા-ઽસઙ્ખ્યપુણ્યપ્રાપ્યસમ્યગજપતાં, પઠતાં, ગુણયતાં,
શૃણ્વતાં, સમનુપ્રેક્ષમાણાનાં, ભવ્યજીવાનાં, અધમવસ્તૂન્યપિ
ઉત્તમવસ્તુભાવ પ્રપદ્યન્તે ॥ ૮॥

ઇતીમં પૂર્વોક્તમિન્દ્રસ્તવૈકાદશ મન્ત્રરાજોપનિષદ્ગર્ભ,
અષ્ટમહાસિદ્ધિપ્રદં, સર્વપાપનિવારણં, સર્વપુણ્યકારણં,
સર્વદોષહરં, સર્વગુણાકરં, મહાપ્રભાવં, અનેક-સમ્યગ્
દૃષ્ટિ-ભદ્રક-દેવતા-શત-સહસ્ર-શુશ્રૂષિતં
ભવાન્તરકૃતા-ઽસઙ્ખ્ય પુણ્ય પ્રાપ્યં સમ્યગ્ જપતાં, પઠતાં, ગુણયતાં,
શૃણ્વતાં, સમનુપ્રેક્ષમાણાનાં, ભવ્યજીવાનાં, ધર્માર્થકામા ગુણાભિરામા
જાયન્તે ॥ ૯॥

ઇતીમં પૂર્વોક્તમિન્દ્રસ્તવૈકાદશ મન્ત્રરાજોપનિષદ્ગર્ભ,
અષ્ટમહાસિદ્ધિપ્રદં, સર્વપાપનિવારણં, સર્વપુણ્યકારણં,
સર્વદોષહરં, સર્વગુણાકરં, મહાપ્રભાવં, અનેક-સમ્યગ્
દૃષ્ટિ-ભદ્રક-દેવતા-શત-સહસ્ર-શુશ્રૂષિતં
ભવાન્તરકૃતા-ઽસઙ્ખ્ય પુણ્ય પ્રાપ્યં સમ્યગ્ જપતાં,
પઠતાં, ગુણયતાં, શૃણ્વતાં, સમનુપ્રેક્ષમાણાનાં, ભવ્યજીવાનાં,
ઐહિક્યઃસર્વાઅપિશુદ્ધગોત્ર-કલત્રત્યવ્ર-મિત્ર-થન-થાન્ય-
જીવિત-યૌવન-રૂપાઽઽરોગ્ય-યશઃ-પુરસ્મરાઃ
સર્વજનાનાં સમ્પદઃ પરભાવ-જીવિત-શાલિન્યઃ સદુદર્કાઃ સુસમ્મુખી
ભવન્તિ । કિં બહુના? ॥ ૧૦॥

ઇતીમં પૂર્વોક્તમિન્દ્રસ્તવૈકાદશ મન્ત્રરાજોપનિષદ્ગર્ભ,
અષ્ટમહાસિદ્ધિપ્રદં, સર્વપાપનિવારણં, સર્વપુણ્યકારણં,
સર્વદોષહરં, સર્વગુણાકરં, મહાપ્રભાવં, અનેક-સમ્યગ્
દૃષ્ટિ-ભદ્રક-દેવતા-શત-સહસ્ર-શુશ્રૂષિતં
ભવાન્તરકૃતા-ઽસઙ્ખ્ય પુણ્ય પ્રાપ્યં સમ્યગ્ જપતાં, પઠતાં,

ગુણયતાં, શૃણ્વતાં, સમનુપ્રેક્ષમાણાનાં, ભવ્યજીવાનાં, આમુષ્મિક્યઃ
સર્વમહિમાસ્વર્ગાપવર્ગશ્રિયોઽપિ ક્રમેણ યથેષ્ઠ (ચ્છ) સ્વયં
સ્વયંવરણોત્સવ સમુત્સુકા ભવન્તીતિ । સિદ્ધિઃ ( દઃ) શ્રેયઃ સમુદયઃ ॥ ૧૧॥

યથેન્દ્રેણ પ્રસન્નેન, સમાદિષ્ટોઽર્હતાં સ્તવઃ ।
તથાજ્યં સિદ્ધસેનેન, પ્રપેદે સમ્પદાં પદમ્ ॥ ૧॥

॥ ઇતિ શ્રીસિદ્ધસેનદિવાકરસૂરિ વિરચિતઃ વર્ધમાન શક્રસ્તવઃ સમ્પૂર્ણઃ ॥

॥ નમુત્થુણં સૂત્ર ॥

નમુત્થુણં, અરિહન્તાણં, ભગવન્તાણં ૧

આઇગરાણં, તિત્થયરાણં, સયંસમ્બુદ્ધાણં ૨

પુરિસુત્તમાણં, પુરિસ સીહાણં, પુરિસવર પુણ્ડરીઆણં,
પુરિસવર ગન્ધહત્થીણં ૩

લોગુત્તમાણં, લોગ નાહાણં, લોગ હિઆણં,
લોગ પઈવાણં, લોગ પજ્જો અગરાણં ૪

અભયદયાણં, ચક્ખુદયાણં,
મગ્ગદયાણં, સરણદયાણં, બોહિદયાણં ૫

ધમ્મદયાણં, ધમ્મદેસયાણં, ધમ્મનાયગાણં,
ધમ્મસારહીણં, ધમ્મ-વર-ચાઉરન્ત-ચક્કવટ્ટીણં ૬

અપ્પડિહય વરનાણ દંસણધરાણં, વિયટ્ટ છૌમાણં ૭

જિણાણં, જાવયાણં, તિન્નાણં, તારયાણં, બુદ્ધાણં,
બોહયાણં, મુત્તાણં, મોઅગાણં ૮

સવ્વન્નૂણં, સવ્વ-દરિસીણં, સિવ-મયલ-મરુઅ-મણન્ત-
મક્ખય-મવ્વાબાહ-મપુણરાવિત્તિ સિદ્ધિગૈ-નામધેયં ઠાણં સમ્પત્તાણં,
નમો જિણાણં, જિઅ-ભયાણં ૯

જે અ અઈયા સિદ્ધા, જે અ ભવિસ્સન્તિ-ણાગએ કાલે સમ્પૈ અ વટ્ટમાણા,
સવ્વે તિ-વિહેણ વન્દામિ ૧૦

॥ ઇતિ નમુત્થુણં સૂત્ર સમ્પૂર્ણ ॥

Encoded and proofread by DPD

*Shakrastavah*

pdf was typeset on March 14, 2019

Please send corrections to *sanskrit@cheerful.com*